नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **27**

# P-95-Sanskrit (V) (Spl. Supp.)

No. of Printed Pages – **08**

# प्रवेशिका विशेष पूरक परीक्षा, 2017

# संस्कृतविशेषः

समय : $3\frac{1}{4}$ होराः

पूर्णांक : 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।

1. “नपुंसकस्य झलचः” “विभाषा ङिश्योः” अनयोरेकस्य सूत्रस्यार्थो लेख्यः ? **1**

2. निर्देशानुसारं रूपाणि लिखत : **¾ + ¾ = 1½**

    (अ) अस्मद् शब्दस्य चतुर्थी विभक्तेः

    (ब) पति शब्दस्य तृतीया विभक्तेः

3. अनयोः पदयोः मूलशब्दं विभक्तिं वचनञ्च लिखत : **¾ + ¾ = 1½**

    (अ) रमया

    (ब) यूयम्

4. निर्देशानुसारं धातुरूपाणि लिखत : **¾ + ¾ = 1½**

    (अ) वृत् (वृतु वर्तने) धातोः लट्लकारे–प्रथमपुरुषस्य ।

    (ब) कृ (डुकृञ़ करणे) धातोः लृट्लकारे–उत्तमपुरुषस्य ।

5. निम्नलिखितयोः लकारं पुरुषं वचनञ्च लिखत : **¾ + ¾ = 1½**

    (अ) नृत्येत्

    (ब) अतुदः

6. वाच्यपरिवर्तनं कुरूत : **1 + 1 = 2**

    (अ) बालकः लेखं लिखति ।

    (ब) पुत्रेण फलं खाद्यते ।

7. “कृत्तद्धितसमासाश्च” इति सूत्रस्यार्थो लेख्यः : **2**

8. यथेच्छं द्वयोः अर्थो लेख्यः । **1 + 1 = 2**

(i) औङ् आपः

(ii) इदुद्भ्याम्

(iii) वाऽम्शसोः

9. आधारः कति-विधः ? नामानि लिखत । **1 + 1 = 2**

10. "अधिहरि" इत्यत्र अव्ययसंज्ञाविधायकं सूत्रं लिखत । **2**

11. अधोलिखितेषु द्वयोः सोदाहरणार्थः लेख्यः : **1½ + 1½ = 3**

(i) कर्तुरीप्सिततमं कर्म

(ii) उपान्वध्याङ्वसः

(iii) यतश्च निर्धारणम्

12. अधोलिखितेषु छन्दःसु द्वयो लक्षणोदाहरणे लिखत : **1½ + 1½ = 3**

(i) मालिनी

(ii) हारिणी

(iii) शार्दूलविक्रीडितम्

13. कयोश्चिद् द्वयोः अलङ्कारयोः लक्षणोदाहरणे लिखत : **1½ + 1½ = 3**

(i) दृष्टान्तः

(ii) विभावना

(iii) विशेषोक्तिः

14. अधोलिखितेषु यथेच्छं त्रयाणामर्थं विलिख्य वाक्यप्रयोगं कुरूत : **1 + 1 + 1 = 3**

(i) उच्चैः

(ii) अलम्

(iii) विना

(iv) कृत्वा

(v) स्मारं स्मारम्

15. अधोलिखित–शब्दानां (प्रत्येकस्य) पर्यायत्रयं लिखत : **1 + 1 + 1 + 1 = 4**

(i) मनुष्यः

(ii) स्त्री

(iii) पुत्रः

(iv) नेत्रम्

16. अधोलिखितेषु चत्वारः प्रश्नाः समाधेयाः : **1 + 1 + 1 + 1 = 4**

(i) वेदाः कति सन्ति ?

(ii) पापसंहारिणी नदी कास्ति ?

(iii) भारतस्य प्रमुखाः पर्वताः के ?

(iv) लक्ष्मीः कं नरम् उपैति ?

(v) देवाः कैः प्रसन्नाः भवन्ति ?

(vi) "लोकदेवता रामदेवः" पाठस्य लेखकः कः ?

17. निम्नाङ्कितेषु पञ्च प्रश्नाः समाधेयाः : **1 + 1 + 1 + 1 + 1 = 5**

(i) विष्णुशर्मा कीदृशः अध्यापकः आसीत् ?

(ii) महिलारोप्यं नाम नगरं कुत्रासीत् ?

(iii) दमनककरटकौ कौ स्तः ?

(iv) आगते बिडाले मूषकः किमकरोत् ?

(v) कीदृशः पुरुषः स्वपत्न्यापि त्यक्तो भवति ?

(vi) वायसदम्पती कुत्र निवसतः ?

(vii) पिङ्गलकस्य भ्रातुः किं नाम आसीत् ?

18. अधोलिखितयोः कथयोः एकस्याः सारांशः स्वसंस्कृते हिंद्यां लेख्यः : **2**

(i) धूर्तदमनकस्य कथा

(ii) टिट्टिभ–समुद्र कथा

19. अधोलिखितेषु द्वयोः सूत्रनिर्देशपूर्वकं सिद्धिः विधेया : **2½ + 2½ = 5**

(i) रामेण

(ii) सर्वे

(iii) हरयः

(iv) त्रयाणाम्

(v) वर्षाभूः

20. अधोलिखितेषु प्रयोगेषु द्वयोः ससूत्रं सिद्धिः विधेया : **2½ + 2½ = 5**

रमाभिः, मतीः, स्त्रियः, सर्वस्यै, तिसृणाम्

21. निम्नाङ्कितेषु द्वयोः सिद्धिः विधेया : **2½ + 2½ = 5**

ज्ञानम्, वारिणी, दध्नोः, श्रीपम्, प्रद्यु

22. अधोलिखितोहरणेषु केषाञ्चन पञ्च प्रयोगाणां ससूत्रं विभक्तिं निर्दिशत : **1 + 1 + 1 + 1 + 1 = 5**

(i) द्रोणो व्रीहिः

(ii) तण्डुलान् ओदनं पचति ।

(iii) अधिशेते वैकुण्ठं हरिः ।

(iv) अक्ष्णा काणः ।

(v) मुक्तये हरिं भजति ।

(vi) ग्रामाद् आयाति ।

(vii) कटे आस्ते ।

23. अधोलिखितगद्ययोरेकस्य सप्रसङ्गव्याख्या कार्या : **3**

ये सेवकाः कोपप्रसादवस्तूनि विचिन्त्य राजसु व्यवहरन्ति त एव धुन्वन्तमपि पार्थिवमारोहन्ति । ये दुरात्मानः "दुराराध्या हि राजानः" इति वदन्ति ते वस्तुतः स्वात्मनः प्रमादालस्यजाड्यानि हि ख्यापयन्ति । दमनकस्योत्साहं विलोक्य, करटक आह – अथ भवान् किं कर्तुमनाः ?

**अथवा**

इति समालोच्य तादृशं जनं सञ्चिन्वन् सिंहः कस्मिश्चित् स्थाने दधिकर्णनामानं बिडालं ददर्श । सः तं बिडालं सौहार्दप्रदर्शनेन समाश्वास्य स्वस्थानं निनाय । तत्रानीय तस्य भोजनपानादिव्यवस्थां सम्पाद्य स्वकन्दरे तं दधिकर्णं स्थापयामास ।

24. एकस्य श्लोकस्य सप्रसङ्गान्वयपूर्वकं व्याख्या कार्या 3

(i) मानवामानितं दानवाबाधितं

निर्जराराधितं सज्जनासाधितम् ।

पण्डितैः पूजितं पक्षिभिः कूजितं

भूतले भाति मेडनारतं भारतम् ।।

वा

(ii) मरूः सुवर्णो न हि येन दृष्टः

किं तेन मान्याः ! कुहचित् सुदृष्टम् ।

मरौ सुमेरूः स्फुटमेव भाति

मृग्यः स कृष्णासु कथं शिलासु ।।

25. अधोलिखितपद्ययोः कस्यचित् एकस्य सप्रसङ्गान्वयभावार्थो लेख्यः : 3

(i) सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।

सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत् ।।

(ii) विषय-विष-विरक्तः सत्यसन्धः समन्तात्

प्रबल-बल-विपक्ष-क्षोद-दक्षः क्षितीन्द्रः ।

विनय-नयविभातः श्रीप्रतापः प्रतापी

प्रणतिततिमलं मे साम्प्रतं स्वीकरोतु ।।

26. कमप्येकं विषयमवलम्ब्य शतपदेषु संस्कृते निबन्धं लिखत : **4**

(i) विद्याधनं सर्वधन प्रधानम्

(ii) मानवजीवने विज्ञानम्

27. भवान् अजयः राजकीय–प्रवेशिका–संस्कृत–विद्यालय महादेवपुरस्य प्रधानाध्यापकाय शुल्कमुक्त्यर्थं प्रार्थना–पत्रम् लिखत । **3**

**अथवा**

भवान् धनञ्जयः स्वरचनाप्रकाशनार्थं वैदिकमाला–पत्रिकायाः सम्पदकमहोदयाय पत्रं लिखतु ।